## शिक्षा निदेशालय, राष्ट्रीय राजधानी क्षेत्र, दिल्ली

**||अभ्यासप्रश्न- पत्रम्||**

**(2023-24)**

**संस्कृतम्**

**कक्षा -नवमी**

**समयः-होरात्रयम्** **अंकाः-80**

**निर्देशाः-**

**१ . अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।**

खण्डः (क) अपठितावबोधनम् - 10 अङ्काः

खण्डः (ख) रचनात्मक – कार्यम् - 15 अङ्काः

खण्डः (ग) अनुप्रयुक्त- व्याकरणम् – 25 अङ्काः

खण्डः (घ) पठितावबोधनम् - 30 अङ्काः

२ . प्रत्येकम् खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।

३ . प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीयानि ।

४ . सर्वेषाम् प्रश्नानाम् उत्तराणि संस्कृते लेखनीयानि ।

५. प्रश्नानां निर्देशाः ध्यानेन पठनीयाः।

**खण्डः – क**

**अपठितांश-अवबोधनम् (10 अङ्काः )**

1 . **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।**

एकः मानवः अरण्ये भ्रमति स्म । श्रान्तो भूत्वा स एकस्य घनच्छायातरोः मूलम् उपाश्रितः । सः तरुः संयोगवशात् कल्पतरुः आसीत् । पिपासाकुलः सः अचिन्तयत् कुत्र जलं लभेय इति । एवं चिन्तयतः एव तस्य पुरस्तात् एको जलघटः उपस्थितोऽभवत् । विस्मितः सन् असौ पयः पानं कृत्वा तृषाम् अशमयत् । होराद्वये व्यतीते सः बुभुक्षाम् अन्वभवत् अचिन्तयच्च- अस्मिन् वने कथं प्राप्येत भोजनम् ? तदैव अकस्मात् विविधव्यंजनपूर्णं भोजनपात्रं समुपनतम् । भोजनान्ते सः विश्राम कर्तुम् ऐच्छत् । तस्य चिन्तनसमकालम् एव विश्रामस्य अपि उपनता । शय्यायां ससुखं शयित्वा यदा असौ उदतिष्ठत् तदा मरीचिमाली स्वकिरणान् संहरति स्म । सोऽचिन्तयत्- एषः संध्याकालः । अत्र वने

DoE, Delhi

अवस्थानं न युक्तम् I कदाचित् सिंहः आगच्छेत् मां च खादेत्। एवं चिन्तयति तस्मिन् सिंहः आगत्य आक्रम्य च तं नरं भक्षितवान् I " वयं यादृशं चिन्तयामः तादृशाः भवामः " I

**अ.एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** **1 X 2=2**

**(i)** मानवः कुत्र भ्रमति स्म ?

**(ii)** भोजनान्ते मानव किम् ऐच्छत् ?

**(iii)** नरं कः भक्षितवान् ?

**ब. पूर्णवाक्येन उत्तरत –(केवलं प्रश्नद्वयम्)** **2x2=4**

**(i)** मानवः कदा बुभुक्षाम् अन्वभवत् ?

**(ii)** सिंहः कदा समायात ?

**(iii)** पयः पानं कृत्वा मानव काम् अशमयत् ?

**स. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।**

1x1=1

**द. यथानिर्देशम् उत्तरत-(केवलं प्रश्नप्रश्नत्रयम् )** **1x3=3**

**(i)** ' पिपासाकुलः सः अचिन्तयत् ' अत्र ' सः ' सर्वनाम कस्मै प्रयुक्तम् ?

(क)मानवाय(ख)तरवे(ग)भोजनाय(घ)सिंहाय

**(ii)** ' विविधव्यंजनपूर्णं भोजनपात्रं ' अत्र विशेषणपदं किम् ?

(क)विविधव्यंजनपूर्ण(ख)भोजनपात्रं(ग)अत्र(घ)बुभुक्षाम्

**(iii)**' सूर्यः ' इत्यर्थे गद्यांशे किं पदं प्रयुक्तम् ?

(क)कल्पतरुः(ख)जलघटः(ग)मरीचिमाली(घ)संध्याकालः

**(iv)** ' प्रातः कालः ' इति पदस्य विलोमपदं गद्यांशे किम् ?

(क)पिपासाकुलः(ख)अवस्थानं(ग)पुरस्तात्(घ)संध्याकालः

**खण्ड – (ख)**

**रचनात्मककार्यम् (15 अङ्काः)**

**2.** **भवतः नाम जयप्रकाशः अस्ति I भवान् नवमी कक्षायां पठति I भवान अकस्मात् ज्वरेण पीड़ितः अस्ति।अतः भवान् विद्यालयात् एकस्य दिवसस्य अवकाशं प्राप्तुम् इच्छति I एतदर्थं प्रधानाचार्यं प्रति प्रार्थना- पत्रं लिखत I** **5x1=5**

DoE, Delhi

**3.अधः प्रदत्तं चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहाय्येन पञ्च वाक्यानि संस्कृते लिखत I**

**1x5=5**



मञ्जूषा

| |
|---|
| वृक्षः ,फलानि,अधः,शाखाः,पत्राणि , पतितः,वृक्षस्य, स्तम्भः,छाया |

अथवा

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः लिखत I**

**प्रदूषणम्**

मञ्जूषा

| |
|---|
| वाहनानि, वसुन्धरा,धूमम्, सर्वत्र,प्रदूषणम्,वायुः,मार्गेषु, हानिकारकः |

DoE

**4.अधोलिखितानां वाक्यानां संस्कृतेन अनुवादं कुरुत ।**

**( केवलं वाक्यपञ्चकम् )**

1x 5= 5

1. राधा गाना गाती है।**Radha Sings.**
2. श्याम पुस्तक पढ़ता है। **Shyam reads a book.**
3. पिता पुत्र के साथ जाता है ।**The father goes with the son.**
4. निर्धन के लिए वस्त्र देता है। **Gives clothes to the poor.**
5. हिमालय से गंगा बहती है। **Ganga flows from the Himalayas.**
6. भारत हमारा देश है। **India is our country.**
7. संतोष में सुख है । **There is happiness in satisfaction .**

**खण्ड - (ग)**

**अनुप्रयुक्त व्याकरणम् (25 अङ्का:)**

**5. अधोलिखितानां पदानां सन्धिपदं/ सन्धिच्छेदं वा कुरुत । ( केवलं प्रश्नचतुष्टयम् )**

**1 x 4 = 4**

1. नायक : अभिनय करोति ।
2. सूर्य +उदयः अभवत् ।
3. अहं नद्या स्नानार्थम् गमिष्यामि ।
4. काकः तां प्रति+अवदत् ।
5. विद्या +अध्ययनाय गुरुकुलम् अगच्छत्

**6 .यथानिर्देशम् उचितं विभक्तिं प्रयुज्य रिक्तस्थान -पूर्तिं कुरुत -(केवलं प्रश्नचतुष्टयम् )**

**1x4=4**

**(i)**............मत्सया: तरन्ति ।

क ) नद्यः ख) नदीभिः ग) नदीषु घ)नद्या:

**(ii)** गंगा........... निस्सरति ।

क)हिमालयात् ख)हिमालय: ग)हिमालयस्य घ) हिमालये

DoE, Delhi

(iii).............स्वभाव : मधुसञ्चयः।

क)मधुमक्षिका ख)मधुमक्षिकाया: ग)मधुमक्षिकया घ)मधुमक्षिकै:

(iv) वृद्धः भ्रमणाय गच्छति I अत्र ' भ्रमणाय ' इत्यस्मिन् पदे विभक्तिः का ?

क) द्वितीया ख)तृतीया ग)चतुर्थी घ) षष्ठी

(v)................हिमालये निवसन्ति I

क) मुनिः ख )मुनयः ग )मुनये घ)मुनिना

**7. उचितलकारं प्रयुज्य ( क्रियापदं ) चित्वा वाक्यानि पूरयत - (केवलं प्रश्नचतुष्टयम् )**

**1x4=4**

(i)बालका : पुस्तकानि .........I

क)पठामि ख)पठन्ति ग)पठतः घ)पठाम:

(ii)भवान् सत्य.........I

क)वदतु ख)वदत ग)वद घ)वदताम्

(iii)अहं श्व : विद्यालय न............I

क)अगच्छत् ख)गच्छति ग)गमिष्यामि घ)गच्छतु

(iv) सर्वे सुखिनः .............I

क)भवतु ख)भवन्तु ग)भवेत् घ)भवताम्

(v)' सेव् ' धातोः लोट्लकारे मध्यमपुरुष एकवचनस्य रूप किम् ?

क)सेवस्व ख)सेवताम् ग)सेवै घ)सवध्वे

**8. कारकोपपदविभक्तिम् आश्रित्य उचितपदानि विकल्पेभ्यः चिनुत (केवलं प्रश्नचतुष्टयम् )**

**1x4=4**

(i)________ परितः वनानि सन्ति I

(क)ग्रामात् ख) ग्रामं ग) ग्रामः घ) ग्रामे

(ii)बालिका _______ सह आपणं गच्छति I

(क)जनकः ख) जनकात् ग) जनकेन घ) जनकस्य

(iii)श्री _________ नमः I

(क) गुरवे ख) गुरुं ग) गुरुः घ) गुरोः

DoE, Delhi

(iv)गंगा .................. प्रवहति l

क)हिमालयेन ख)हिमालयस्य ग) हिमालयात् घ)हिमालये

(v)....................स्वाहा l

क) इन्द्रः ख)इन्द्राय ग)इन्द्राभ्याम् घ)इन्द्रेण

**9.रेखांकितपदेषु प्रकृतिः प्रत्ययं विभज्य/ संयोज्य वा लिखत (केवलं प्रश्नत्रयम् ). 1x3=3**

(i) माता वस्त्रं प्र + क्षाल+ ल्यप् भोजनं पचति

( क ) प्रक्षालय ( ख ) प्रक्षाल्य ( ग ) प्रक्षालय(घ )प्रक्षालयित्वा

(ii)क्रीडक : क्रीड् + तुमुन् क्रीडाक्षेत्रं गच्छति l

( क ) क्रीडितुम् ( ख ) क्रीडतुम् ( ग ) क्रीतुम् ( घ)क्रेतुं

(iii)श्रोतारः कथां श्रोतुम् मन्दिरम् गच्छन्ति l

( क ) श्रु + तुमुन् ( ख ) श्रो + तुमुन् ( ग ) श्रुत् + तुमुन् (घ)श्र् +तुमुन्

(iv)राम : रावणं हत्वा सीतां प्रप्नोति l

( क) हन् + क्त्या ( ख ) हन् + तुमुन् ( ग ) हन् + क्त्वा (घ)सत्व+आ

(v)मयूर : नर्तितुम् स्वपक्षान् उद्घाटयति l

( क ) नृत् + तुमुन् ( ख ) नर्तृ + तुमुन् (ग)नर्तन्+तुमुन् (घ)नतृन्+तुमुन्

**10. अङ्कानां स्थाने उचितसंख्यापदानि लिखत - (केवलं प्रश्नचतुष्टयम् ) 1/2x4=2**

(i)एकस्मिन् मासे प्रायः .................. ( 30 ) दिनानि भवन्ति l

(ii)सप्ताहे ..............( 7 ) दिनानि भवन्ति l

(iii)क्षेत्रे ..................( 12 ) बालकाः क्रीडन्ति l

(iv)वर्ष..................... ( 24 ) पक्षाः भवन्ति l

(v)अत्र ...................( 15 ) बालकाः पठन्ति।

**11.अधोलिखितपदेषु उपसर्गं संयोज्य/विभज्य वा लिखत (केवलं प्रश्नचतुष्टयम् ) 1/2x4=2**

1. प्रयत्नः
2. प्रति +उपकार :
3. विजयते

DoE, Delhi

4. निर् +गच्छति
5. परित्यजामि

**12. कोष्टकेभ्य: शुद्धम् अव्ययपदं चित्वा रिक्तस्थानं पूरयत् - (केवलं प्रश्नचतुष्टयम् ) 1/2x4=2**

(i)त्वम् कस्य .................. गच्छसि I ( पुरतः/ परितः )

(ii)................... हर्षवर्धन: राजा आसीत् I( पुरा /वृथा )

(iii)...................विदधीत न क्रिया I (सहसा/ कुत्रापि )

(iv)कक्षायां .......................तिष्ठ I(यद्यपि/तूष्णीम्)

(v)असत्यम्.....................वद(वृथा /मा )

**खण्ड -घ**

**पठितावबोधनम् (30अङ्का: )**

**13. अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

आसीत् कस्मिंश्चिद् अधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः I तस्य च गृहे लौहघटिता पूर्वपुरुषोपार्जिता तुला आसीत् I तां च कस्यचित् श्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशान्तर प्रस्थितः I ततः सुचिर काल देशान्तर यथेच्छया भ्रान्त्वा पुनः स्वपुरम् आगत्य तं श्रेष्ठिनम् अवदत् " भोः श्रेष्ठिन् I दीयतां मे सा निक्षेपतुला " सोऽवदत्- " भोः ! नास्ति सा त्वदीया तुला मूषकैः भक्षिता " इति I जीर्णधनः अवदत्- ' भो श्रेष्ठिन् ! नास्ति दोषस्ते , यदि मूषकैः भक्षिता I ईदृशः एव अयं संसारः I न किञ्चिदत्र शाश्वतमस्ति I "

**अ .एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** 1/2X 2=1

(i)वणिक्पुत्रस्य नाम किम् ?

(ii)तुला कैः भक्षिता ?

(iii)जीर्णधनः कुत्र प्रस्थितः ?

**ब. पूर्णवाक्येन उत्तरत –(केवलं प्रश्नद्वयम्)** 2x1=2

(i) जीर्णधनः किम् अवदत्?

(ii ) " नास्ति दोषस्ते " इति कः अवदत् ?

(iii ) कस्य गृहे लौहघटिता पूर्वपुरुषोपार्जिता तुला आसीत् ?

DoE, Delhi

स. यथानिर्देशम् उत्तरत-(केवलं प्रश्नद्वयम् )　　　　　　　　　　1x2=2

(i) ' नश्वरम् ' इति पदस्य किं विपरीतार्थकपदं गद्यांशे प्रयुक्तम् ?

(ii)' खादिता ' इति पदस्य पर्यायपदं गद्यांशे किम् ?

(ii)' अवदत् ' इति क्रियापदस्य कर्तृपदम् अत्र किम् ?

**14.** अधोलिखितं पद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

**पिबन्ति नद्यः स्वयमेव नाम्भ :**
**स्वयं न खादन्ति फलानि वृक्षाः ।**
**नादन्ति सस्यं खलु वारिवाहा :**
**परोपकाराय सतां विभूतयः ।।**

अ.एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)　　　　　　　　　　1/2 X 2=1

(i)के फलानि न खादन्ति ?

(ii)नद्यः स्वयं किं पिबन्ति ?

(iii)के सस्यं न अदन्ति ?

ब. पूर्णवाक्येन उत्तरत -(केवलं प्रश्नद्वयम्)　　　　　　　　　　1x2=2

(i)केषां विभूतय: परोपकाराय भवन्ति ?

(ii) वारिवाहा : किं कुर्वन्ति ?

(iii) परोपकाराय वृक्षा: किं न खादन्ति?

स.यथानिर्देशम् उत्तरत-(केवलं प्रश्नद्वयम् )　　　　　　　　　　1x2=2

(i) "अनुकूलानि" इति पदस्य विपरीतार्थकं पदम् श्लोकात् चित्वा लिखत -

(ii) "अन्येषाम्" इत्यर्थं किं पदम् श्लोके प्रयुक्तम् ?

(iii)" आत्मन: प्रतिकूलानि परेषां न समाचरेत् " अत्र "समाचरेत्" इति क्रियापदस्य कर्तृपदं किम् ?

**15.** संवादान् पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत

DoE, Delhi

चन्दनः - किमर्थं क्रुद्धसि !तव हस्तनिर्मितानि मोदकानि दृष्ट्वा अहं जिह्वालोलुपतां नियन्त्रयितुम् अक्षमः अस्मि, किं न जानासि त्वमिदम् ?

मल्लिका -सम्यक् जानामि नाथ! परम् एतानि मोदकानि पूजानिमित्तानि सन्ति I

चन्दनः - तर्हि शीघ्रमेव पूजनं सम्पादय I प्रसादं च देहि I

मल्लिका -भो! अत्र पूजनं न भविष्यति I अहं स्वसखिभिः सह श्वः प्रातः काशीविश्वनाथमंदिरं प्रति गमिष्यामि, तत्र गंगास्नानं धर्मयात्राञ्च करिष्यामः I

**अ.एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** 1/2x 2=1

**(i)**कानि पूजानिमित्तानि सन्ति ?

**(ii)**कः प्रसादम् इच्छति ?

**(iii)** मल्लिका काभिः सह गमिष्यति

**ब. पूर्णवाक्येन उत्तरत –(केवलं प्रश्नद्वयम्)** 1x2=2

**(i)** चन्दनः किमर्थं जिह्वालोलुपतां नियन्त्रयितुम् अक्षमः आसीत् ?

**(ii)** मल्लिका प्रातः कुत्र गमिष्यति ?

**(iii)**चंदनः किं नियंत्रयितुम् अक्षमः अस्ति?

**स. यथानिर्देशम् उत्तरत-(केवलं प्रश्नद्वयम् )** 1x2=2

**(i).**"समर्थः" इति पदस्य विपरीतार्थकं पदम् संवादात् चित्वा लिखत –

**(ii)**"परम् एतानि मोदकानि पूजानिमित्तानि सन्ति I" अत्र "सन्ति" इति क्रियापदस्य कर्तृपदं किम् ?

**(iii)**"त्वरितम्" इत्यर्थं किं पदम् अनुच्छेदे प्रयुक्तम् ?

**16. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरूत -** 1x4=4

**(i)** वसन्ते सरसाः <u>रसाला</u> : लसन्ति I

**(ii)** सूर्योदयात् पूर्वमेव <u>बालिका</u> तत्रोपस्थिता I

**(iii)** लुब्धया बालिकया <u>लुब्धस्य</u> फलं प्राप्तम् I

(iv) <u>खलानां</u> मैत्री आरम्भगुर्वी भवति I

(v) <u>मोदकानि</u> पूजानिमित्तानि रचितानि आसन्

DoE, Delhi

**17.मञ्जूषापदसहायतया समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत -**
1X3=3

**सा तदा करुणा वाचो विलपन्ती सुदुःखिता ।**

**वनस्पतिगतं गृधं ववर्शायतलोचना ।।**

**अन्वयः -** तदा करुणा ...............विलपन्ती सुदुःखिता.................सा ( सीता )................गृध्रं ददर्श।

मञ्जूषा-

| |
|---|
| आयतलोचना , वाचः ,वनस्पतिगतम् |

अथवा

**श्लोकस्य भावार्थं मञ्जूषापदसहायतया पूरयित्वा लिखत**

**गुणा : गुणज्ञेषु गुणा भवन्ति,**

**ते निर्गुण प्राप्य भवन्ति दोषाः ।**

**आस्वाद्यतोयाः प्रवहन्ति नद्यः,**

**समुद्रमासाद्य भवन्त्यपेयाः ।।**

**भावार्थ:-** गुणा : सदैव गुणीनां **( i )............** प्राप्य सद्गुणाः भवन्ति परन्तु गुणहीनान् प्राप्य दोषरुपे **(ii)...................**भवन्ति यथा नद्याः जलं स्वादिष्टं शुद्धं पेयं च भूत्वा अपि समुद्रे मिलित्वा **(iii)..............**भवति। अतः गुणीजनैः कदापि दुर्जनस्य संगतिः न कर्तव्या ।

**मञ्जूषा -**

| |
|---|
| संगतिं , अपेयं, परिवर्तिताः |

**18.** **अधोलिखित-कथाशं समुचित -क्रमेण लिखत-** 1/2x8=4

**(i)**ग्रामे एका अपरा लुब्धा वृद्धा न्यवसत् ,तस्याश्च अपि एका पुत्री आसीत् ।

**(ii)** बालिका काकं प्रार्थयत् " तण्डुलान् मा भक्षय । "

**(iii)** लुब्धया बालिकया लोभस्य फल प्राप्तम् ।

DoE, Delhi

**(iv)**काक : प्रोवाच- " मा शुचः अहं तुभ्यं तण्डुलमूल्यं दास्यामि । "

**(v)**लघुतमां मञ्जूषां प्रगृह्य बालिका गृहं गतवती ।

**(vi)**माता पुत्रीम् आदिशत् " सूर्यातपे तण्डुलान् खगेभ्यो रक्ष । "

**(vii)**गर्वितया बालिकया प्रोक्तम् " स्वर्णमयेन सोपानेन अहम् आगच्छामि"।

**(viii)**कस्मिंश्चिद् ग्रामे एका निर्धना वृद्धा स्त्री न्यवसत् ।

**19.(क) रेखांकितपदानि आधृत्य प्रसंगानुसारम् अर्थचयनं चित्वा लिखत –** 1/2x4=2

(i)**<u>आञ्जनेयम्</u>** अपि अतिक्रामसि ।

( क ) रामम् ( ख) ईश्वरम्( ग ) हनुमन्तम्( घ ) लक्ष्मणम्

(ii) तदियं भगवत्याः **<u>शारदायाः</u>** अवमानना ।

( क ) देव्याः ( ख ) सरस्वत्याः ( ग ) लक्ष्म्याः ( घ ) दुर्गायाः

(iii)अनेन **<u>राक्षसेन्द्रेण</u>** करुणं पापकर्मणा ।

(क)रावणेन (ख)रामेण (ग)लक्ष्मणेन (घ)गरुडेन

(iv)पुरा कस्मिंश्चिद् ग्रामे एका **<u>निर्धना</u>** स्त्री न्यवसत्।

(क)धनिका (ख)धनहीना (ग)शोभना (घ)तर्षिता

**ख.अधोलिखितानाम् शब्दानाम् अर्थैः सह मेलनं कुरुत -** 1/2x4=2

| | | |
|---|---|---|
| **(i)** | खलानां | जलम् |
| **(ii)** | सलिलम् | पन्थानः |
| **(iii)** | अवलोक्य | दृष्ट्वा |
| **(iv)** | मार्गाः | दुर्जनानां |

DoE, Delhi